## शकधृषज्ञाग्लाघटरभलभक्रमसहार्हास्त्यर्थेषु तुमुन्। (६५/३१७७)

शकादिषूपपदेषु अस्त्यर्थेषु [1]वा धातुमात्रात् तुमुन् प्रत्ययो भवति। अक्रियार्थोपपदार्थोऽयमारम्भः। शक्नोति भोक्तुम्। धृष्णोति भोक्तुम्। जानाति भोक्तुम्। ग्लायति भोक्तुम्। [2]घटते भोक्तुम्। आरभते भोक्तुम्। [3]लभते भोक्तुम्। प्रक्रमते भोक्तुम्। [4]सहते भोक्तुम्। अर्हति भोक्तुम्। अस्त्यर्थेषु खल्वपि – अस्ति भोक्तुम्। [5]भवति भोक्तुम्॥

## पर्याप्तिवचनेष्वलमर्थेषु। (६६/३१७८)

पर्याप्तिः अन्यूनता। पर्याप्तिवचनेषु [6]अलमर्थेषु उपपदेषु धातोस्तुमुन् प्रत्ययो भवति। पर्याप्तो भोक्तुम्। अलं भोक्तुम्। [7]भोक्तुं पारयति। पर्याप्तिवचनेषु इति किम्? अलं [8]कृत्वा। अलमर्थेषु इति किम्? पर्याप्तं भुङ्क्ते। पूर्वसूत्रे शकिग्रहणमनलमर्थम्, शक्यमेवं कर्तुम् इति॥

## कर्तरि कृत्। (६७/२८३२)

कृत्सञ्ज्ञकाः प्रत्ययाः कर्तरि कारके भवन्ति। कृदुत्पत्तिवाक्यानामयं शेषः। तत्र येषु [9]अर्थनिर्देशो नास्ति तत्रेदमुपतिष्ठते, अर्थाकाङ्क्षत्वात्। न ण्वुल्त्रादिवाक्येषु, साक्षादर्थनिर्देशे सति तेषां निराकाङ्क्षत्वात्। कारकः। कर्ता। नन्दनः। ग्राही। पचः॥

## भव्यगेयप्रवचनीयोपस्थानीयजन्याप्लाव्यापात्या वा। (६८/२८०४)

[10]भव्यादयः शब्दाः कर्तरि[11] वा निपात्यन्ते। 'तयोरेव कृत्यक्तखलर्थाः' (३.४.७०/२८३३) इति भावकर्मणोः प्राप्तयोः कर्ता [12]च वाच्यः पक्षे [13]उच्यते। [14]भवत्यसौ भव्यः, भव्यमनेन इति वा। गेयो माणवकः साम्नाम्, गेयानि माणवकेन सामानि इति वा। प्रवचनीयो गुरुः स्वाध्यायस्य, प्रवचनीयो गुरुणा स्वाध्याय इति वा। उपस्थानीयो[15]ऽन्तेवासी गुरोः, उपस्थानीयः शिष्येण वा गुरुः। जायतेऽसौ जन्यः, जन्यमनेन इति [16]वा। आप्लवतेऽसावाप्लाव्यः, आप्लाव्यमनेन इति वा। आपतति असावापात्यः,[17] आपात्यमनेन इति वा॥

## लः कर्मणि च भावे चाकर्मकेभ्यः। (६९/२१५२)

लः इत्युत्सृष्टानुबन्धं सामान्यं [18]गृह्यते, प्रथमाबहुवचनान्तं चैतत्। लकाराः[19] कर्मणि कारके भवन्ति, चकारात् कर्तरि च। अकर्मकेभ्यो[20] धातुभ्यो भावे भवन्ति, पुनश्चकारात् कर्तरि च। गम्यते[21] ग्रामो देवदत्तेन। गच्छति ग्रामं देवदत्तः। अकर्मकेभ्यः – आस्यते देवदत्तेन। आस्ते देवदत्तः। सकर्मकेभ्यो भावे न भवन्ति॥

---

1. धातुषु इत्यधिकम् फ, अस्त्यर्थेषु च धातुषु ब.ह. 2. उदाहरणमिदं नास्ति फ. 3. आलभते ब. 4. उत्सहते ब. 5. उदाहरणमिदं नास्ति फ. 6. अलमर्थे विशिष्टेषु ब.फ.ह. 7. उदाहरणमिदं नास्ति ब. 8. उक्त्वा फ. 9. अर्थादेशः अ. 10. भव्यगेयादयः क. 11. कारके इत्यधिकम् ब. 12. च नास्ति फ. 13. कथ्यन्ते फ. 14. भवत्यसौ – स्वाध्यायः इति नास्ति क. 15. शिष्यः ब.ह.फ. 16. वा नास्ति फ. 17. ऋहलोर्ण्यत् इति आवश्यके ण्यत् इत्यधिकम् ब.क.फ.ह. 18. एकम् इत्यधिकम् अ, एकमेव इत्यधिकम् क. 19. सकर्मकेभ्यो धातुभ्यः इत्यधिकम् फ. 20. तु इत्यधिकम् ह, धातुभ्यः नास्ति फ. 21. असौ इत्यधिकम् फ.